# Shri Ramasahasranama Stotram rakArAkSharapUrvakam

# રકારાક્ષરપૂર્વકં શ્રીરામસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : rakArAtmaka shrIrAmasahasranAmastotram

File name : rakArAtmakarAmasahasranAmastotram.itx

Category : sahasranAma

Location : doc_raama

Transliterated by : DPD, help from Alex

Proofread by : DPD, PSA Easwaran, Ravin Bhalekar

Source : brahmayAmale sRiShTiprashaMsAyAM

Latest update : May 21, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2022

*sanskritdocuments.org*

# રકારાક્ષરપૂર્વકં શ્રીરામસહસ્રનામસ્તોત્રમ્

બ્રહ્મયામલે સૃષ્ટિપ્રશંસાયામ્ ।
શ્રીગણેશાય નમઃ ।
શ્રીદેવ્યુવાચ ।
ૐ દેવદેવ મહાદેવ ભક્તાનુગ્રહ કારક ।
ત્વતઃ શ્રુતં મયા પૂર્વં મન્ત્રાણિ શતકોટયઃ ॥ ૧॥

તન્ત્રાણિ તન્ત્રજાલાનિ સરહસ્યાનિ યાનિ ચ ।
તાનિ તાનિ મહાસિદ્ધિઃ કલ્પિતાનિ શુભાનિ ચ ॥ ૨॥

ગુટિકા પાદુકા સિદ્ધિઃ પરકાય પ્રવેશનમ્ ।
વાચાસિદ્ધિશ્ચાર્થસિદ્ધિ ચ તથા સિદ્ધિર્મનોમયી ॥ ૩॥

જ્ઞાન વિજ્ઞાન કર્માણિ નાના સિદ્ધિ કરાણિ ચ ।
લક્ષ્મીકુતૂહલા સિદ્ધિ વાઞ્છાસિદ્ધિશ્ચખેચરી ॥ ૪॥

કેનેદં સર્વમાપ્નોતિ દેવમે વદ તત્ત્વતઃ ।
શ્રીશિવ ઉવાચ ।
લક્ષવાર સહસ્રાણિ વારિતાસિ ચ ત્વં પ્રિયે ॥ ૫॥

સ્ત્રી સ્વભાવાન્મહાદેવિ પુનસ્ત્વં પરિપૃચ્છતિ ।
શ્રીદેવ્યુવાચ ।
પ્રાણનાથ શિવ શમ્ભો કરુણાનિધિશઙ્કર ॥ ૬॥

શ્રીરામતત્ત્વજિજ્ઞાસા જાયતે પરમેશ્વર ।
રહસ્યં રામચન્દ્રસ્ય રકારાક્ષરપૂર્વકમ્ ॥ ૭॥

રામસાહસ્રકં બ્રૂહિ યદ્યહં તવ વલ્લભા ।
નારી વા પુરુષો વાઽપિ સ્મૃત્વા બ્રહ્મત્વમાપ્નુયાત્ ॥ ૮॥

તદ્રહસ્યં સમાસેન વદસ્વ કરુણાનિધે ।
શ્રીશિવ ઉવાચ -

મહાગુહ્યં મહાગોપ્યં મહામઙ્ગલદાયકમ્ ॥ ૯॥

મહાસિદ્ધિકરં પુંસાં મહાવ્યાધિવિનાશનમ્ ।
મહાપાપહરં સાક્ષાત્ સર્વસૌભાગ્યવર્ધનમ્ ॥ ૧૦॥

રાજ્યં દેયં શિરો દેયં દેયં સ્ત્રી પુત્રકં શિવે ।
આત્મતુલ્ય ધનં દેયં ન દેયં રામતત્વકમ્ ॥ ૧૧॥

તથાપિ નામસાહસ્રં દેવાનામપિ દુર્લભમ્ ।
ન પ્રોક્તં કસ્યચિત્ કાઽપિ કસ્મિન્ કાલે મહેશ્વરિ ॥ ૧૨॥

તવ સ્નેહાત્ પ્રવક્ષ્યામિ શ ृણુત્વં શુભગાનને ।
વિનિયોગઃ -
ૐ અસ્ય શ્રીરકારાદિશ્રીરામસહસ્રનામસ્તોત્રમન્ત્રસ્ય
શ્રીભગવાન્નારાયણ ઋષિઃ । શ્રીદેવી ગાયત્રી છન્દઃ।
શ્રીરામચન્દ્રો દેવતા । શ્રી રાં ક્લીં બીજં। હ્રીં શક્તિઃ ।
ૐ અવ્યક્ત ઇતિ કીલકમ્ । મમ ધર્માર્થકામમોક્ષાર્થે જપે વિનિયોગઃ ॥

ઋષ્યાદિન્યાસઃ -
ૐ શ્રીભગવન્નારાયણઋષયે નમઃ શિરસિ ।
ૐ શ્રીદેવી ગાયત્રી છન્દસે નમઃ મુખે ।
ૐ શ્રીરામચન્દ્રદેવતાયૈ નમઃ હૃદિ ।
ૐ રાં ક્લીં બીજાય નમઃ ગુહ્યે ।
ૐ હ્રીં શક્તયે નમઃ પાદયોઃ ।
ૐ અવ્યક્ત કીલકાય નમઃ સર્વાઙ્ગે ॥

કરન્યાસઃ -
ૐ રાં શ્રીં ક્રુદ્ધોલ્કાય સ્વાહા - અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ રાં ક્લીં મહોલ્કાય સ્વાહા - તર્જનીભ્યાં નમઃ ।
ૐ રાં હ્રીં વીરોલ્કાય સ્વાહા - મધ્યામાભ્યાં નમઃ ।
ૐ રાં રીં વિદ્યુલ્કાય સ્વાહા - અનામિકાભ્યાં નમઃ ।
ૐ રાં ક્રૂં ક્લીં અર્ધોલ્કાય સ્વાહા - કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ રાં રાં રાં શ્રીં ક્લીં હ્રીં રાં ક્રૂં ક્લીં
સહસ્રોલ્કાય સ્વાહા-કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

અઙ્ગન્યાસઃ -
ૐ રાં શ્રીં ક્રુદ્ધોલ્કાય સ્વાહા હૃદયાય નમઃ ।

ૐ રાં ક્લીં મહોલ્કાય સ્વાહા શિરસે સ્વાહા ।
ૐ રાં હ્રીં વીરોલ્કાય સ્વાહા શિખાયૈ વષટ્ ।
ૐ રાં રીં વિદ્યુલ્કાય સ્વાહા - કવચાય હુમ્ ।
ૐ રાં ક્રૂં ક્લીં અધોલ્કાય સ્વાહા - નેત્રત્રયાય વૌષટ્ ।
ૐ રાં રાં રાં શ્રીં ક્લીં હ્રીં રાં ક્રૂં ક્લીં સહસ્રોલ્કાય સ્વાહા-અસ્ત્રાય ફટ્ ॥

ધ્યાનમ્ -
નીલેન્દીવરતુલ્યશ્યામવદનં પીતામ્બરાલઙ્કૃતમ્
મુદ્રાં જ્ઞાનમયીં દધાનમપરાં પદ્માસને સંસ્થિતામ્ ।
સીતાં પાર્શ્વગતાં સરોરુહકરાં વિદ્યુન્નિભાં રાઘવમ્
પશ્યન્તીં મુકુટાં ગદાદિ વિવિધૈઃ કલ્પોજ્વલાઙ્ગં ભજે ॥ ૧૩॥

અથ સ્તોત્રમ્ ।
ૐ રામો રામકરો દીપ્તો રક્તનેત્રો રમાપતિઃ । (દીર્ઘો)
રણભૂમિવિહારી ચ રક્તપાદો રુણચ્છવિઃ ॥ ૧૪॥

રઘુવીરો મહાવીરો ધીરો વૈ સર્વરાટ્ રવિઃ ।
રઙ્ગનાથાર્ચિતપદો રામો રાજીવલોચનઃ ॥ ૧૫॥

રાજધર્મપ્રિયોઽરિષ્ટો વિશિષ્ટો રાક્ષસાન્તકૃત્ ।
રામો અનન્તમર્યાદાપાલકો રાઘવો હરિઃ ॥ ૧૬॥

રમ્ભાફલ કૃતાહારો રમ્ભાપ્રાણ સુરોત્તમઃ ।
રમારમણસર્વેશો રઘુવંશ કૃતાલયઃ ॥ ૧૭॥

રત્નરત્નાનિ વર્માણિ દિવ્યરત્નવિભૂષિતઃ ।
ઋષીશ્વરો મહાપ્રાજ્ઞો રાજત્કેયૂરકુણ્ડલઃ ॥ ૧૮॥

રઞ્જકો ભઞ્જકો ખર્વો રક્તવસ્ત્રસદાપ્રિયઃ ।
રણમૂર્ત્તિઃ રણેકર્મા રણધ્યાનપરાયણઃ ॥ ૧૯॥

રણયુદ્ધરતો વિદ્વાન્ રણવિદ્યાતિચાતુરઃ ।
રિમ્ફતું સ્ફુરિતાઙ્ગાનિ રાજીવો રાજસપ્રિયઃ ॥ ૨૦॥

રઙ્ગમૂર્તિઃ રાજભોગી રાજ્યભોગપ્રદઃ પુમાન્ ।
રમાકર્મરતો વીરો રમાસન્તુષ્ટચેતસઃ ॥ ૨૧॥

રમાવિહારી રઘુરાટ્ રમાસત્યૈકવિગ્રહઃ ।
રમાવિગ્રહધારી ચ રમાધ્યાનપરાયણઃ ॥ ૨૨॥

રમાઽભિચારનિરતો રમાઽઽજ્ઞાપરિપાલકઃ ।
રમાકર્મૈકસન્તુષ્ટો રમારમણવત્સલઃ ॥ ૨૩॥

રમાપ્રમોદસહિતો રમા અગ્રગતો હરિઃ ।
રમાસહાયો ભગવાન્ રાવણપ્રાણહારકઃ ॥ ૨૪॥

રમાસર્વકરી સાક્ષી રામભદ્રો રમાનિધિઃ ।
રમાપ્રિયો રમેયાત્મા રમાભાગ્ય વિવર્દ્ધનઃ ॥ ૨૫॥

રમાકાન્તો રમાનાથો રાઘવોઽરિષ્ટભઞ્જનઃ ।
રમા વિશ્વસ્ય જનની રાઘવેન્દ્રસ્વરૂપધૃક્ ॥ ૨૬॥

રમાપ્રચારી ભગવાન્ રમાસમ્બોધનપ્રિયઃ ।
રમાકાર્યરતો રિક્તો રમાલાવણ્યસમ્ભવઃ ॥ ૨૭॥

રામાદાનરતો શ્રીશો રમાપાલનપાલકઃ ।
રમારમેન્દ્ર રક્તાઙ્ગો રક્તવિગ્રહવિગ્રહઃ ॥ ૨૮॥

રમાદયાકરો વિષ્ણુઃ આદિનારાયણઃ કવિઃ ।
રમાવિશ્વસ્વરૂપાત્મા શ્રીકૃષ્ણઃ કાલશાસનઃ ॥ ૨૯॥

રમાસર્વકરીયન્ત્રઃ રામચન્દ્રમનુવ્રતઃ ।
રાઘવો ભાગ્યવાન્ વીરો રણમધ્યે જયપ્રદઃ ॥ ૩૦॥

રમા સઙ્ઘેન સંરમ્ભો રમાપૂજા સદાપ્રિયઃ ।
રમાહાસ્ય સુહાસી ચ રમાસખ્યૈકસુન્દરઃ ॥ ૩૧॥

રમાવિધાનસમ્પન્નો રમાનન્દનકારકઃ ।
રમાસર્વપરિતૃપ્તો રમાકારણકારણઃ ॥ ૩૨॥

રમામાનપ્રકારી ચ રમાજ્ઞાનવિશારદઃ ।
રમાખેલનખેલા ચ રમાવેલા રમાપતિઃ ॥ ૩૩॥

રમાસઙ્કટહર્ત્તા ચ નૃસિંહો ભક્તવત્સલઃ ।
રમાપ્રતીતસહિત તસ્યાજ્ઞાપરિપૂર્ણતઃ ॥ ૩૪॥

રામચન્દ્રશ્ચન્દ્ર લક્ષ્મી રમાચર્ચિતપાદયઃ ।
રમાલોકવિલાસી ચ રમા રામસ્ય સર્વદા ॥ ૩૫॥

રમાસુધર્મકર્મા ચ રમાસર્વાર્થસાધકઃ ।

રમાકીટપતઙ્ગાદ્યા રમા સર્વમિદં જગત્ ॥ ૩૬॥

રમાપાદમહાપુણ્યમયો રામો ધુરન્ધરઃ ।
રમાપ્રવીણો વિશ્વાત્મા સર્વાત્મા વિશ્વપૂજિતઃ ॥ ૩૭॥

રમાસ્થાવરરૂપા ચ રઘુવંશેઽતિનિર્મલઃ ।
રમાપ્રસાદસહિતો રમાચઞ્ચલચઞ્ચલઃ ॥ ૩૮॥

રમાભરણભૂતાત્મા રમાપોષણકારકઃ ।
રમાપૂર્ણિત પૂર્ણાત્મા રમાવારાહસંયુતઃ ॥ ૩૯॥

રમાકૂર્મેણસહિતા રમામત્સ્યસમન્વિતાઃ ।
રમાનૃસિંહસહિતા રમાવામનસંયુતા ॥ ૪૦॥

રમા રામેણસહિતા રમાકૃષ્ણપરાયણા ।
રમા બૌદ્ધસ્વરૂપા ચ રમા કલ્કિસ્વરૂપધૃક્ ॥ ૪૧॥

રમાવિષ્ણુસ્વરૂપાત્મા રમા રામ સદાગતિઃ ।
રમા મતિસ્વરૂપાત્મા રમાસંસર્ગસઙ્ગમઃ ॥ ૪૨॥

રમાપ્રધાનમાનજ્ઞો રમાસર્વેશ્વરો હરિઃ ।
રમાશરીરવાસી ચ રમાવિજ્ઞાનદર્શકઃ ॥ ૪૩॥

રમાતત્ત્વોપદેષ્ટા ચ રમામન્ત્રપરાયણઃ ।
રમાભોગપ્રદાતા ચ રમાદુઃખવિમોચકઃ ॥ ૪૪॥

રમાસુરેન્દ્રચર્ચાતુ રમા માનસમાનસઃ ।
રમાતર્પણતૃપ્તા રમાગાથાઽરુણાકૃતિઃ ॥ ૪૫॥

રમાગૌરિમયીમૂર્ત્તિઃ રમાશ્યામાસ્વરૂપકા ।
રમા પીતસ્વરૂપા ચ રઘુનાથો પુરાતનઃ ॥ ૪૬॥

રમાકરો રમાદાન્તો રમાસત્ત્વો રમાચ્છવિઃ ।
રમાઽધરો મહાવીરો રમા અવ્યક્તદર્શનઃ ॥ ૪૭॥

રમાતત્ત્વ પરિજ્ઞાની રમારાજ્યવિહારકઃ ।
રમારેવાતટે ધીરો રમામન્ત્રજપોત્કટઃ ॥ ૪૮॥

રમાસુરેન્દ્રવન્દ્યાશ્ચ રઘુઃ સર્વાઙ્ગસુન્દરઃ ।
રમા આબ્રહ્મસંયુક્તા રાઘવસ્ય પ્રિયા સતીઃ ॥ ૪૯॥

રમા યજ્ઞમયી મૂર્તિઃ રામચન્દ્રસ્ય સઙ્ગતિઃ ।
રમારૂપી રામચન્દ્રો પરબ્રહ્મસ્વરૂપકઃ ॥ ૫૦॥

રક્તચન્દનલિપ્તાઙ્ગો રક્તમાલ્યાનુલેપનઃ ।
રક્તપુષ્પપ્રિયો રામો વેદવિદ્યાવિશારદઃ ॥ ૫૧॥

રક્તવસ્ત્રવિલાસી ચ રાઘવો રઘુપુઙ્ગવઃ ।
રમા સેવાકરો યસ્ય સત્યસન્ધઃ પ્રતાપવાન્ ॥ ૫૨॥

રાજાધિરાજો ભગવાન્ ચતુર્ધા મૂર્તિધારકઃ ।
રાજેન્દ્રો ભવહર્ત્તા ચ રાક્ષસેન્દ્રવરપ્રદઃ ॥ ૫૩॥

રાજકીર્ત્તિર્લોકમૂર્ત્તિઃ રામઃ સત્યપરાક્રમઃ ।
રમા યસ્યાર્ધદેહસ્થા રામો ઘોરાઘમર્દનઃ ॥ ૫૪॥

રાઘવેન્દ્રો વીરભદ્રો રણકર્કશકર્કશઃ ।
રાકિન્યાદ્યામહાશક્તિઃ સેવ્યમાનપદામ્બુજઃ ॥ ૫૫॥

રમારમિણ્યાસર્વેશો મહારાજો મહાદ્યુતિઃ ।
રાજ્યદો ભક્તભક્તાનામભક્તાનાં ચ કિઙ્કરઃ ॥ ૫૬॥

રતિપ્રિયો રતિનાથો રાગી રાગવિશારદઃ ।
રવિઃ શનૈશ્ચરો ભદ્રો ગ્રહરૂપી જનાર્દનઃ ॥ ૫૭॥

રામકલા રામક્લિન્નો રમાભાગ્યો રમાઙ્ગદઃ ।
રમારામ ભવો ભીમો ભયભીતિવિનાશકૃત્ ॥ ૫૮॥

રમાક્રિયા રમાવીર્યો સર્વધર્મૈકસાધકઃ ।
રક્તપાત્રપ્રિયો રામો રક્તનેત્રવરઃ પ્રભુઃ ॥ ૫૯॥
રક્તમાંસપ્રિયો વીરો નારાયણસ્વરૂપકઃ ।
રક્તાસ્થિચર્વકો વિદ્વાન્ દીનાનાથો દિનઃ પ્રભુઃ ॥ ૬૦॥
રમારક્તેશ્વરો શુદ્ધો રામશ્ચૈતન્યચેતસઃ ।
રામો અપૂર્વકર્મજ્ઞો ધર્મકર્મપ્રવર્તકઃ ॥ ૬૧॥

રામો વિશ્વસ્ય કર્તા ચ રામો વિશ્વસ્ય નન્દનઃ ।
રામો વિશ્વસ્ય લુપ્તા ચ રામો વિશ્વકુલાન્તકઃ ॥ ૬૨॥

રામો વિશ્વસ્ય ભર્ત્તા ચ રામો રાજ્યાધિપેશ્વરઃ ।
રામો જગદ્ધિતો વીરો રામઃ સર્વાર્થદર્શકઃ ॥ ૬૩॥

રામો વિરામો વિરજો કૌશલ્યાનન્દવર્ધનઃ ।
રામઃ સુરાતૃપ્તિકર્તા રામો માંસસ્ય ભક્ષકઃ ॥ ૬૪॥

રામઃ શ્રીશામ્ભવઃ સાક્ષાત્ શ્રીસીતા શામ્ભવી પરા ।
રામશ્ચક્રપ્રચારી ચ રામસ્ત્રૈલોક્યવ્યાપકઃ ॥ ૬૫॥

રામઃ સદાશિવો મૂર્ત્તિઃ કાલમૂર્તિર્દિગમ્બરઃ ।
રામઃ કૃપાકરો દેવો વિશ્વવ્યાપી નિરઞ્જનઃ ॥ ૬૬॥

રામો નિરામયો નિત્યો નિત્યસર્વગતોઽવ્યયઃ ।
રામો વાયુસ્વરૂપાત્મા રામાકાશ્યૈકરૂપકઃ ॥ ૬૭॥

રામો ધરામૂર્ત્તિરૂપો રામઃ કાલાન્તકો હરિઃ ।
રામો વિભીષણશ્રીદઃ પરબ્રહ્મમયોદિતઃ ॥ ૬૮॥

રામો રાક્ષસહન્તા ચ રાક્ષસાનાં કુલાન્તકઃ ।
રમ્યમાનપદામ્ભોજઃ રમતે સકલં જગત્ ॥ ૬૯॥

રુક્મિણીપ્રિયકર્ત્તા ચ રુક્મિણીમાનસેસ્થિતઃ ।
રુક્મિણી ચાર્થદાતા ચ રુક્મિણી વલ્લભો હરિઃ ॥ ૭૦॥

રુક્મિણીસિદ્ધિદઃ સિદ્ધો સિધ્યસાધ્યાદિવન્દિતઃ ।
રુક્મિણીપ્રિયભાગ્યશ્ચ રુક્મિણીભાગ્યવર્ધનઃ ॥ ૭૧॥

રુક્મિણીભક્તિભક્તશ્ચ રુક્મિણીસૌખ્યદર્શકઃ ।
રુક્મિણીશ્રીસ્વરૂપા ચ રુક્મિણીપ્રાણનાયકઃ ॥ ૭૨॥

રુક્મિણીભોગભુક્તશ્ચ રુક્મિણીભગતર્પણઃ ।
રુક્મિણીદુઃખહર્ત્તા ચ રુક્મિણીદિવ્યદર્શનઃ ॥ ૭૩॥

રુક્મિણીરૂપરૂપા ચ સ્ત્રીરૂપા ચ પતિવ્રતાઃ ।
રુક્મિણીસઙ્ગસઙ્ગા ચ રામો નારાયણોઽવ્યયઃ ॥ ૭૪॥

રુક્મિણીરાજ્યદાતા ચ રુક્મિણીવાક્યસિદ્ધિદઃ ।
રુક્મિણી કષ્ટહર્તા ચ રુક્મિણી દ્વારકેશ્વરી ॥ ૭૫॥

રાધાઽઽરાધિતવિત્તાત્મા રાધાવન્દિત સર્વદા ।
રાધાનામસદાઽઽનન્દઃ રાધાત્રૈલોક્યમોહિની ॥ ૭૬॥

રાધાસિદ્ધિ સુનિષ્ઠા ચ રાધાભક્તિરતો રઘુઃ ।
રાધારૂપી રામચન્દ્રો રાધામોહનમોહનઃ ॥ ૭૭॥

રાધામન્ત્રસ્વરૂપાત્મા શ્રીમાન્દાશરથિઃ પ્રભુઃ ।
રાધાસુખનિધાનં ચ રામો વિશ્વસ્ય મોહનઃ ॥ ૭૮॥

રાધાપ્રાણતૃપ્તિકરો રાધાકર્મપ્રચારકઃ ।
રાધાસત્યવ્રતાધીનો રામનામ સદાગતિઃ ॥ ૭૯॥

રકારઃ સર્વદેવાનાં સાક્ષાત્ કાલાનલઃ પ્રભુઃ ।
રકારઃ સર્વદેવાનાં તેજપુઞ્જઃ સનાતનઃ ॥ ૮૦॥

રકારઃ સર્વભૂતાનાં જીવરૂપી જનાર્દનઃ ।
રકારઃ સર્વજીવાનાં સર્વપાપસ્ય દાહકઃ ॥ ૮૧॥

રકારઃ સર્વસૌખ્યાનાં સિદ્ધિદસ્તુ પુરાતનઃ ।
રકારઃ સર્વવિદ્યાનાં વેદસ્તત્ત્વસનાતનઃ ॥ ૮૨॥

રકારઃ સર્વસાધ્યાનાં સાધકોઽનન્તરૂપધૃક્ ।
રકારઃ સર્વભૂતાનાં વ્યાપ્યવ્યાપકમીશ્વરઃ ॥ ૮૩॥

રકારોત્પદ્યતે નિત્યં રકારો લીયતે જગત્ ।
રકારો નિર્વિકલ્પશ્ચ શુદ્ધબુદ્ધ સદાઽવ્યયઃ ॥ ૮૪॥

રકારઃ સર્વકામશ્ચ પરિપૂર્ણમનોરથઃ ।
રકારો જાયતે બ્રહ્મા રકારો જાયતે હરિઃ । ॥ ૮૫॥

રકારો જાયતે શમ્ભુઃ રકારઃ સર્વશક્તયઃ ।
રકારઃ સર્વદુષ્ટાનાં નાશકો રઘુનાયકઃ ॥ ૮૬॥

રકારઃ સર્વસિદ્ધીનાં સ્મરણાત્ દાયકો ગુરુઃ ।
રકારો ધર્મકામાનાં મોક્ષશ્ચાર્થૈકસિદ્ધિકૃત્ ॥ ૮૭॥

રકારઃ સર્વસત્ત્વાનાં મહામોદમયઃ સ્વરાટ્ ।
રામહાસ્યકારી માયા રકારો વિદ્યતે સદા ॥ ૮૮॥

રામકીર્ત્તિકરી માયા માયારામયશસ્કરી ।
રામતેજકરી માયા સર્વકાલેષુ સર્વદા ॥ ૮૯॥

રામરાજ્યકરી માયા રાજરાજમયો હરિઃ ।
રામભોગકરી માયા કાલકાલે નિરન્તરમ્ ॥ ૯૦॥

રામદુર્ગમહન્તા ચ રામસૌભાગ્યસુન્દરઃ ।

રામસર્વાર્થદાતા ચ ભગવાન્ ભવભઞ્જનઃ ॥ ૯૧॥

રામનામ સદાऽऽનન્દો રામનામ સદાગતિઃ ।
રામનામ સદાતુષ્ટો રામનામસ્વરૂપકઃ ॥ ૯૨॥

રામનામપરા વેદાઃ રામનામ સદાશુચિઃ ।
રામનામપરા યજ્ઞાઃ રામનામપરો ધ્વનિઃ ॥ ૯૩॥

રામનામપરં બીજં રામનામપરં જગત્ ।
રામો ઉદારકર્મા ચ રામશ્ચ સકલં જગત્ ॥ ૯૪॥

રામો દયાકરો દીર્ઘો દુઃખદારિદ્ર્યમર્દનઃ ।
રામનામ પરં જ્ઞાનં વિશ્વં રામસ્ય ચાશ્રયમ્ ॥ ૯૫॥

રામાત્ પરતરં નાસ્તિ કાર્યકારણગૌરવમ્ ।
રામસ્તપોનિધિર્દેવો દીર્ઘનેત્રો દ્યુતિચ્છદઃ ॥ ૯૬॥

રામઃ કોશસ્ય ભોક્તા ચ રાજરાજો ધનાધિપઃ ।
રામો બાણધરઃ શ્રીમાન્ ચાપતૂણીરપૂરકઃ ॥ ૯૭॥

રામઃ પરાક્રમી કામી કામદેવસ્ય પાલકઃ ।
રામો હરઃ પાર્વતીશો સ્મર્યતે ચ દિવાનિશમ્ ॥ ૯૮॥

રાજયોગસ્ય સિદ્ધીનાં રાજરાજેશ્વરોऽભવેત્ ।
રકારાદીનિ નામાનિ શ ૃણ્વતો મમ પાર્વતિ ॥ ૯૯॥

મનઃ પ્રસન્નતામેતિ રામનામાભિશઙ્કયાઃ ।
રામઃ સુરેન્દ્રો રુદ્રશ્ચ નારદાદ્યા મહર્ષયઃ ॥ ૧૦૦॥

રામસ્સેવકસેવ્યશ્ચ રાઘવો વિશ્વરાઘવઃ ।
રામસ્વરૂપી રામાત્મા રામઃ પ્રાણપતિપ્રિયઃ ॥ ૧૦૧॥

રામઃ કૃપાકરી મૂર્તિઃ રામભદ્રો જયપ્રદઃ ।
રામનામ સદા સેવ્યો રામાચાર્યો મુનીશ્વરઃ ॥ ૧૦૨॥

રામઃ પ્રેમકૃપાસિન્ધુઃ રામનામ ધનપ્રદઃ ।
રામનામ મહાવીર્યો પૂર્ણપુણ્યવિવર્ધનઃ ॥ ૧૦૩॥

રઙ્કુતઙ્કુશ્ચ કૃત્યાત્મા રેણુકાયાર્થદાયકઃ ।
રવીન્દ્રો રઘુવરો રાજરાજો મહાભુજઃ ॥ ૧૦૪॥

રવિઃ ધ્યાનં રવિઃ પૂજા રવિર્મૂર્તિઃ સનાતનઃ ।
રવિઃ સર્વસ્વ દાતા ચ તેજઃપુઞ્જમયઃ પુમાન્ ॥ ૧૦૫॥

રવિઃ કલાનિધિઃ સાક્ષાત્ કૃષ્ટભ્રષ્ટસ્તપઃક્રિયાઃ ।
રવિઃ કૈવલ્યવર્ણ ચ રવિસ્તીવ્રોગ્રવર્ચસઃ ॥ ૧૦૬॥

રવિર્નિત્યગતો ધ્યેયો રવિઃ સત્ય પ્રિયંવદઃ ।
રવિર્ધર્મા રવિઃ કર્મા રવિર્ગોમા રવિર્હુતઃ ॥ ૧૦૭॥

રવિર્દાતા રવિર્ભોક્તા રવિર્લોકપિતામહઃ ।
રવિમૂર્ત્તિસ્તુ સર્વેષાં દેવાનામાલયં પરમ્ ॥ ૧૦૮॥

રવિરૂપી મહાપ્રાજ્ઞો રમેશઃ પરમાર્થકઃ ।
ઋક્ષસખ્યો ઋક્ષભૃત્યો ઋક્ષમન્ત્રીકૃતઃ પ્રભુઃ ॥ ૧૦૯॥

ઋક્ષરાજ્યપ્રદો ઋક્ષો ઋક્ષાણાં પાલનોદ્યતઃ ।
ઋક્ષરાજવધોપેતો સુગ્રીવસ્યાર્થદો વિભુઃ ॥ ૧૧૦॥

રાજરાજેશ્વરો વિષ્ણુઃ રાજરાજેશ્વરી ક્રિયા ।
રાજચક્રપ્રવાસી ચ નષ્ટરાજ્યાર્થી સિદ્ધિકૃત્ ॥ ૧૧૧॥

રાજરાજાધિરાજેશો વીરઃ સત્યપ્રતાપવાન્ ।
રાજસેવાકરો જિષ્ણુઃ ઇન્દ્રઃ સર્વાઽખિલેષ્ટદઃ ॥ ૧૧૨॥

રુરુચર્મપરીધાનો રૌરવાઘહરો હરિઃ ।
રાજધાની રાજકામી મહારાજો મુનીશ્વરઃ ॥ ૧૧૩॥

રાજપ્રિયો રાજભાગ્યો રજોગુણગુણાર્ચિતઃ ।
રઘુવંશી રઘુશ્રેષ્ઠો રાઘવો જ્ઞાનવિગ્રહઃ ॥ ૧૧૪॥

રામો રમાપ્રિયો નિત્યો મુનીનાં માનસાધિપઃ ।
રામો નિત્યનિજાનન્દો રામભક્ત દૃઢવ્રતઃ ॥ ૧૧૫॥

રાજિતઃ સર્વસર્વાઙ્ગો રાજતકેયૂરકુણ્ડલઃ ।
રાજતૂણીરબાણશ્ચ રાજચ્ચાપધરો વિભુઃ ॥ ૧૧૬॥

રાજચ્છવિઃ કૃપાસિન્ધુઃ નીરાજિતપદામ્બુજઃ ।
રાજાસત્યેશ્વરો વીર્યો વિરાજઃ સર્વદુઃખહા ॥ ૧૧૭॥

રિક્તભક્તપ્રશસ્તાત્મા રિક્તાશક્ત વરપ્રદઃ ।
રિક્તપ્રિયો રિક્તમાર્ગો રિક્તાર્થૈકવિમર્દનઃ ॥ ૧૧૮॥

રિક્તસેવા રિક્તવર્ગો રિક્તસ્વભાવભાવનઃ ।
રિક્તકર્ત્તા રિક્તછેત્તા રિક્તવિશ્વપ્રિયંવદઃ ॥ ૧૧૯॥

રિક્તધર્મનિવાસી ચ સર્વાશાપરિપૂરકઃ ।
રિક્તવર્મા રિક્તકર્મા રિક્તધર્મબહિષ્કૃતઃ ॥ ૧૨૦॥

રિક્તસૂક્તો રિક્તવિદ્યા ધનુર્વિદ્યાધરોહરઃ ।
રિક્તવેદવિધાનેન ઋગ્વેદસ્ય પ્રિયો નલઃ ॥ ૧૨૧॥

રિક્તશાસ્ત્રપ્રતિજ્ઞા ચ રિક્તરિક્તોજ્જ્વલઃ પ્રભુઃ ।
રિક્તપૂજ્યો રિક્તસેવ્યો નિત્યરિક્તતપસ્વિનઃ ॥ ૧૨૨॥

રામઃ પરાત્મા ભગવાન્ સૌભાગ્યો ભાગ્યવર્ધનઃ ।
રામઃ કમલપત્રાક્ષો રામસ્તત્ત્વપ્રકાશનઃ ॥ ૧૨૩॥

રામઃ શુભાર્થિનાં નિત્યો કૈવલ્યાગમનિષ્ઠિતઃ ।
રામઃ સુગ્રીવવાલ્મીકો રામો વાલ્મીકિપૂરિતઃ ॥ ૧૨૪॥

રામો નિરામયો દેવો જામ્બવાન્ ભગવાન્ ભવઃ ।
રાજસેવાનિવાસી ચ રાજકર્મમનુવ્રતઃ ॥ ૧૨૫॥

રાજત્કટકધારી ચ વિશ્વરૂપી જનાર્દનઃ ।
રામો વિદ્યાનિધિઃ કાન્તો કાકપક્ષધરો બુધઃ ॥ ૧૨૬॥

રાક્ષસારિર્બ્રહ્મબન્ધુઃ પરબ્રહ્મેન્દ્રસત્કૃતઃ ।
રામો ઇચ્છાપ્રચારી ચ ભગવાન્ ભૂતભાવનઃ ॥ ૧૨૭॥

રામાત્મા પરમાત્મા ચ વિશ્વરૂપપ્રિયાન્વિતઃ ।
રામો વિરામો વૈરાગ્યો મહાવિજ્ઞાનભૈરવઃ ॥ ૧૨૮॥

કુકર્મહર્ત્તા ચ રામઃ શ્રીદઃ ક્રિયાર્થકૃત્ ।
રામઃ સંસારિણાં સાધ્યઃ સૌખ્યદઃ શરણાર્થિનામ્ ॥ ૧૨૯॥

રામો ધરાપતીનાં ચ નીતિરૂપી સહસ્રપાત્ ।
રાક્ષસોઽવ્યક્તમૂર્ત્તીશ્ચ ભૂતભવ્યભવત્પરઃ ॥ ૧૩૦॥
રીતિનીતિરતો ધીમાન્ ઉગ્રસેનો મતિપ્રદઃ ।
ઋણત્રયવિનિર્મુક્તઃ કરુણામયસાગરઃ ॥ ૧૩૧॥

રામો ગણપતિર્ગવ્યો સિદ્ધિબુદ્ધિસમન્વિતઃ ।

રામો ભૈરવમૂર્તિશ્ચ રામો વિશ્વસ્ય દર્પણઃ ॥ ૧૩૨॥

રામઃ શ્રીકામભૂતાત્મા રામો દિઙ્મણ્ડલાવૃતઃ ।
રામો નિર્વાણવર્ણશ્ચ નિર્વાણાર્થપ્રબોધકઃ ॥ ૧૩૩॥

રામઃ શ્રીસર્વનૈમિત્યો નિત્યોનિત્ય ધ્રુવોધ્રુવઃ ।
રામો દ્રવ્યમયો ગમ્યો રામઃ પાતાલનાયકઃ ॥ ૧૩૪॥

રામો બ્રહ્માણ્ડમધ્યસ્થો ગોબ્રાહ્મણહિતે રતઃ ।
રામો દ્વિતીયઃસમ્પન્નો નિવાસી ગહનો ગુહઃ ॥ ૧૩૫॥
રામો નિષ્કૂટરૂપાત્મા નિષ્કૂટાનાં ભયઙ્કરઃ ।
રામો ભીરુમયો ગમ્યો દેવારિભયવર્ધનઃ ॥ ૧૩૬॥

રમા તરઙ્ગરહિતા રામભાર્યારતિપ્રિયા ।
રમાકેલિકુલાચારી રમાઽઽચારી ગુરોર્ગુરઃ ॥ ૧૩૭॥

રશ્મિપ્રિયકરો રમ્યો રશ્મિદીપ્તિકરઃ પુમાન્ ।
રામસ્સન્તુષ્ટવિશ્વાત્મા રાગગાનશુભાનનઃ ॥ ૧૩૮॥

રાગસારો રાગમૂર્તિઃ રાગી રાગો વિરાગહા ।
રાગસેવા રાજનિધિઃ રતિદો ગતિદઃ સ્વરઃ ॥ ૧૩૯॥

રાજિકાભોજનાશક્તો રાજિકાગન્ધસત્કૃતી ।
રાજિકાવિજયીધીરો રાજિકાશાકભોજનઃ ॥ ૧૪૦॥

રાજિકાશત્રુહર્ત્તા ચ રાજિકાનિન્દકાન્તકઃ ।
રાજિકાહોમસન્તુષ્ટો રામચન્દ્રો દયાનિધિઃ ॥ ૧૪૧॥

રાજિકાદર્શનઃ પ્રીતો રાજિકાયાઃ લઘુવૃતઃ ।
રાજિકાભઞ્જકો ભીમો રાજિકાભાવસેવકઃ ॥ ૧૪૨॥

રાજિકાવ્રતદીપ્તાઙ્ગો રાજિકાભાગ્યવર્ધનઃ ।
રાજિકા કુલવિદ્યા ચ રામચન્દ્રો મહેશ્વરઃ ॥ ૧૪૩॥

રાજિકાસ્તમ્ભનોત્સર્ગો રાજિતા ભક્તરક્ષિતઃ ।
રાજિકામુખ્યવીર્યા ચ રાજિકાશક્તિસમ્પુટા ॥ ૧૪૪॥

રાજિકાસઙ્ઘસઙ્ગાઅશ્ચ રાજિકાચન્દનોદ્ધતા ।
રાજિકાવિશ્વવિશ્વા ચ રાજિકારિર્વિનાશનઃ ॥ ૧૪૫॥

રાજિકાપુષ્પપુષ્પા ચ રામચન્દ્રસદાપ્રિયઃ ।

રાજિકાસર્વવશ્યા ચ રાજિકાભીતિભઞ્જનઃ ॥ ૧૪૬॥

રાજિકા સૌમ્યસૌમ્યા ચ રાજિકાદુષ્ટખણ્ડનઃ ।
રાજિકા ક્રૂરકર્મા ચ રાજિકા ઉગ્રવિગ્રહઃ ॥ ૧૪૭॥

રાજિકાપત્રપદ્મા ચ મહારાજો ધુરન્ધરઃ ।
રાજિકાતીવ્રવેગા ચ રાજિકાવાસુકીષ્ટદઃ ॥ ૧૪૮॥

રાજિકામોહનો દેવો દેવદેવો હરીશ્વરઃ ।
રામનામપરો મન્ત્રો રામનામપરા ક્રિયા ॥ ૧૪૯॥

રામનામપરો યજ્ઞો રામનામપરં જપઃ ।
રામનામપરં સારં રામલક્ષ્મીસમાવૃતઃ ॥ ૧૫૦॥

રામો અભયકર્ત્તા ચ રામો અરિવિનાશનઃ ।
રામો જલે ચાન્તરિક્ષે રામઃ સર્વત્રમોદકૃત્ ॥ ૧૫૧॥

રામશ્શુભાનિ કર્માણિ રામોઽપિ અશુભનાશનઃ ।
રામો મનોભવો દેવો મનોમય જગન્મયઃ ॥ ૧૫૨॥

રામો દામોદરો શ્રીશો હૃષીકેશો મહાબલઃ ।
રામઃ માધવસર્વાગ્રો શ્રીદઃ પુણ્યજનાવૃતઃ ॥ ૧૫૩॥

રામો દૈત્યારિઃ સર્વજ્ઞો નીલલોહિતલોચનઃ ।
રામો મહાવિઘ્નહરો રામઃ શ્રીત્રિપુરાન્તકઃ ॥ ૧૫૪॥

રામઃ શમ્ભુઃ ઋષીકેશો ઈશ્વરઃ કલ્મષાપહઃ ।
રામઃ પીતારુણાશ્યામો સર્વદાઽઽનન્દવર્ધનઃ ॥ ૧૫૫॥

રામઃ સાક્ષાત્ કૃતધ્વંસી વ્યોમકેશસ્વરુપધૃક્ ।
રામઃ સર્વચ્છવિઃ કાન્તઃ શાન્તો વિશ્વસ્ય શાસનઃ ॥ ૧૫૬॥

રામઃશાર્ઙ્ગી મહાસેનો નિજાનન્દો મહાભુજઃ ।
રામો હરસ્મરો ભર્ગો સર્વદા ધર્મવર્ધનઃ ॥ ૧૫૭॥

રામો સ્વયંવીતિહોત્રો રામઃ સાક્ષાદ્ ધનઞ્જયઃ ।
રામઃ કૃશાનુરેતા ચ રામઃ પિઙ્ગલપાટલઃ ॥ ૧૫૮॥

રામઃ સ્વયં સુરશ્રેષ્ઠો રામ એવ ત્રિલોચનઃ ।
રામ એવ મહાવીર્યો રામો દિવ્યશુચિર્વૃતઃ ॥ ૧૫૯॥

રામ એવ નિજં નિત્યં બુદ્ધીન્દ્રિયમનોમયમ્ ।
રામ એવ મહાવ્યાસો રામ એવ મહાબલઃ ॥ ૧૬૦॥

રામ એવ નિજં બ્રહ્મ રામ એવ મહાતપઃ ।
રામ એવ મહાહંસો રામાત્મા ગોચરો નરઃ ॥ ૧૬૧॥

રામો નિત્યનિરાકારો રામો ભરતરૂપકઃ ।
રામસ્ત્રૈલોક્યમધ્યસ્થો રામઃ સપ્તવસુન્ધરાઃ ॥ ૧૬૨॥

રામઃ કુમારરૂપાત્મા રામઃ પાખણ્ડભઞ્જનઃ ।
રામો મિથ્યાવિનાશી ચ રામઃ સત્યપ્રવર્તકઃ ॥ ૧૬૩॥

રામો વિશ્વાસવાસી ચ સત્યવાસી સરોરુહઃ ।
રામઃ સર્વગુહાગમ્યો ભક્તાનાં માનસેષ્ટદઃ ॥ ૧૬૪॥

રામઃ પ્રભાકરો જ્યેષ્ઠો ઈપ્સિતાર્થપ્રદર્શકઃ ।
રામસ્તાલાઙ્કુભૂભારહારણો મદભઞ્જનઃ ॥ ૧૬૫॥

રામઃ પ્રાણંડઅપાનશ્ચ રામોદાનસમાનકઃ ।
રામો નાગશ્ચ કૃકલો દેવદત્તો રમેશ્વરઃ ॥ ૧૬૬॥

રામો ધનઞ્જયઃ સત્યો રામઃ પઞ્ચજનાહ્વયઃ ।
રામઃ ક્રૂરસ્ય ક્રૂરાત્મા વૈરામઃ પુરુષપ્રિયઃ ॥ ૧૬૭॥

રામશ્છલનિહન્તારો રામો દિવ્યાન્નદાયકઃ ।
રામો દિવ્યાઙ્ગનાભોગી રામો જ્ઞાનવતાંબરઃ ॥ ૧૬૮॥

રામો નિજપરો મૂર્ત્તિઃ માનવાકૃતિરીશ્વરઃ ।
રામઃ શ્રીતક્ષકો તીવ્રો મહાસત્ત્વેતિ ચઞ્ચલઃ ॥ ૧૬૯॥

રામોદ્વય સદાસીતા સહિષ્ણુર્જગદીશ્વરઃ ।
રામો વીરમતાં શ્રેષ્ઠો સર્વધર્મેષુ વન્દિતઃ ॥ ૧૭૦॥

રામઃ શ્રીપુરુષો દ્વન્દ્વો ક્ષેત્રજ્ઞો ક્ષાત્રમુત્તમઃ ।
રામો અપાંનિધિઃ સૌમ્યો ભગવાન્ કુમ્ભસમ્ભવઃ ॥ ૧૭૧॥

રામો અશોકભૂતાત્મા ભક્તાનાં શોકનાશનઃ ।
રામો મત્સ્યસ્વરૂપાત્મા સર્વસિદ્ધિપ્રદો ગિરઃ ॥ ૧૭૨॥

રામો મહાક્ષો વેદાત્મા અનુકૂલપ્રદો ભવઃ ।
રામઃ સર્વાઙ્ગમાનન્દો નિત્યલક્ષ્મીવિલાસદઃ ॥ ૧૭૩॥

ઇતીદં કથિતં દેવિ રામનામસહસ્રકમ્ ।
ગોપનીયં પ્રયત્નેન પઠનીયં પરાત્પરમ્ ॥ ૧૭૪॥

ન દેયં કસ્ય દેવેશિ ન વાચ્યં કસ્યચિત્ પ્રિયે ।
યે યે પ્રયોગા તન્ત્રેષુ તૈસ્તૈર્યત્ સાધયેત્ ફલમ્ ॥ ૧૭૫॥

તત્ સર્વં સિધ્યતિ નિત્યં રામનામ્નૈવ કીર્ત્તનાત્ ।
રોગાર્ત્તો મુચ્યતે રોગાત્ બન્ધો મુચ્યેત બન્ધનાત્ ॥ ૧૭૬॥

ભીતો ભયાત્ પ્રમુચ્યેત દેવિ સત્યં ન સંશયઃ ।
સ્ત્રીહત્યા બાલઘાતી ચ ગૌહત્યા બ્રહ્મશાસનમ્ ॥ ૧૭૭॥

સર્વહત્યાક્ષયં યાન્તિ પાઠમાત્રેણ પાર્વતિ ।
સ્તેયી ગુર્વઙ્ગનાગામી તથા વિશ્વાસઘાતકી ॥ ૧૭૮॥

પાઠમાત્રેણ દેવેશિ ! સર્વપાપક્ષયો ભવેત્ ।
જીવઘાતી પ્રાણહર્ત્તા ધર્મનષ્ટસ્તુ યો નરઃ ॥ ૧૭૯॥

પઠનાત્ બ્રહ્યસાયુજ્યં પ્રાપ્નુયાત્ નાત્ર સંશયઃ ।
અયોનિગામીનો મૂઢો બ્રહ્મણ્યા સહસઙ્ગમી ॥ ૧૮૦॥

શ્રીરામનામસાહસ્રં પઠનાત્ મુક્તપાતકઃ ।
કુયોનિમૈથુનાદ્ દુષ્ટોઃ દુષ્ટદુર્બુદ્ધિચેતસઃ ॥ ૧૮૧॥

એકાવૃત્ત્યા મહેશાનિ ! સર્વપાપૈઃ પ્રમુચ્યતે ।
ઇતીદં રામસાહસ્રં દશવારં પઠેદ્ યદિ ॥ ૧૮૨॥

સ ગચ્છેત્ વૈષ્ણવલોકં વાયુર્નાવમિવામ્ભસિ ।
ભૂતપ્રેતપિશાચાશ્ચ વેતાલાઃ સિદ્ધચેટકા ॥ ૧૮૩॥

કૂષ્માણ્ડા રાક્ષસા ઘોરા ભૈરવા બ્રહ્મરાક્ષસા ।
શ્રીરામનામગ્રહણાત્ પલાયન્તે દિશો દશ ॥ ૧૮૪॥

શ્રીં હ્રીં રાં ક્લીં નમઃ સ્વાહા એવમષ્ટાક્ષરો મનુઃ ।
જપેત્ સહસ્રનામાન્તે મોહયેત્ સકલં જગત્ ॥ ૧૮૫॥

યત્ર યત્ર જપેત્ વીરઃ શુચિર્ભૂત્ત્વૈકમાનસઃ ।
તત્ર તત્ર જપો ભૂયાત્ નાત્ર કાર્યા વિચારણા ॥ ૧૮૬॥

પૂર્ણિમા અમાવાસ્યાં ચ સઙ્ક્રાન્તૌ યદિ વા ગ્રહણેષ્વપિ ।

એકાદશ્યાં નવમ્યાં વા સાવધાનેન સાધકઃ ॥ ૧૮૭॥

પઠેત્ સહસ્રનામાખ્યં સ્તોત્રં મોક્ષસ્ય સાધનમ્ ।
મોહનં સર્વજીવાનાં ભૂયાત્ રામપ્રસાદતઃ ॥ ૧૮૮॥

એકાવૃત્ત્યા લભેત્ લક્ષ્મીં દ્વિરાવૃત્ત્યા જગદ્વશી ।
ત્રિરાવૃત્ત્યા પઠેન્નિત્યં ષણ્માસાત્ સ શિવો ભવેત્ ॥ ૧૮૯॥

ચતુર્વારં પઠેન્નિત્યં પુત્રવાન્ કીર્તિમાન્ ભવેત્ ।
પઞ્ચવારં પઠેન્નિત્યં દિવ્યકાયો ભવેન્નરઃ ॥ ૧૯૦॥

ષડ્વારં યઃ પઠેત્ નિત્યં સર્વસિદ્ધીશ્વરો ભવેત્ ।
સપ્તવારં પઠેત્ સ્તોત્રં વાચાસિદ્ધિઃ પ્રજાયતે ॥ ૧૯૧॥

અષ્ટવારં પઠેદ્ દેવિ ! ષડઙ્ગાભ્યાંસ યોગતઃ ।
નવવારં પઠેન્નિત્યં ભગવાન્મન્ત્રી નિરામયમ્ ॥ ૧૯૨॥

દશવારં પઠેન્નિત્યં સાક્ષાત્ શ્રીરામચન્દ્રસ્ય
દર્શનં લભતે ધ્રુવમ્ ।
તુલસ્યાશ્વત્થયોર્મધ્યે શાલિગ્રામસ્ય સન્નિધૌ ॥ ૧૯૩॥

એકાહારી ભૂમિશાયી જિતક્રોધી જિતેન્દ્રિયઃ ।
નિત્યભક્ત્યાઽર્ચયેદ્ વિષ્ણું સ મુક્તઃ સર્વપાતકૈઃ ॥ ૧૯૪॥

શ્રીરામં ચ હનૂમન્તં સુગ્રીવં ચ વિભીષણમ્ ।
અઙ્ગદં જામ્બવન્તં ચ સ્મૃત્વા પાપૈઃ પ્રમુચ્યતે ॥ ૧૯૫॥

રાજદ્વારે ચ સઙ્ગ્રામે નદીનદસમુદ્રગે ।
દુર્ભિક્ષે વિગ્રહે ઘોરે શ્મશાને ચ ચતુષ્પથે ॥ ૧૯૬॥

યત્ર યત્ર ભયે પ્રાપ્તે તત્ર તત્ર પઠેદ્ ધ્રુવમ્ ।
વિજયં સર્વમાપ્નોતિ દુર્લભં સુલભં ભવેત્ ॥ ૧૯૭॥

સત્યં સત્યં પુનઃ સત્યં ગોપ્તવ્યં પશુસન્નિધૌ ।
તવ ભક્ત્યા મયા ખ્યાતં નાખ્યેયં યસ્ય કસ્યચિત્ ॥ ૧૯૮॥

ઇહલોકે સુખી ભૂત્વા પરે મુક્તિર્ભવિષ્યતિ ।
તત્ર રૂપૈઃ વિવિધાકારૈઃ સેવ્યમાનં પરાત્ પરમ્ ॥ ૧૯૯॥

વિશ્વાવસું ચિત્રકેતું ચિત્રસેનાદ્યલૂકકમ્ ।
શ્રીહરિઃ ૐ હરિઃ રાં હરિઃ ક્લીં હ્રીં સ્વાહા ॥ ૨૦૦॥

॥ શ્રી બ્રહ્મયામલેતન્ત્રે સૃષ્ટિપ્રશંસાયાં ઉમામહેશ્વરસંવાદે
રકારાદિ શ્રીરામસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

રકારાત્મક શ્રીરામસહસ્રનામસ્તોત્રં

Note: Being part of the Brahmayamala Tantra, some of the names follow tantra practices. The devotion should be emphasize than literal meanings to them.

Proofread by DPD, PSA Easwaran, Ravin Bhalekar

---

*Shri Ramasahasranama Stotram rakArAkSharapUrvakam*
pdf was typeset on December 17, 2022

Please send corrections to *sanskrit@cheerful.com*